विज्ञातैर्वेत्ति तीर्थानि चारकैः” भा॰स॰५ अ॰। “तीर्थानि मन्त्रिप्रभृतीन्यष्टादश यान्यवगाह्य राजा कृतकृत्यो भवति तानि चोक्तानि नीतिशास्त्रे “मन्त्री१ पुरोहित२श्चैव युवराजश्च३ भूपतिः४ पञ्चमो द्वारपालश्च५ षष्ठोऽन्तर्वेंशिकस्तथा६। कारागाराधिकारी७ च द्रव्यसञ्चयकृत्तथा८। कृत्याकृत्येषु चार्थानां नवमो विनियोजकः९। प्रदेष्टा१० नगराध्यक्षः११ कार्य्यनिर्माणकृत्तथा१२। धर्माध्यक्षः१३ सभाध्यक्षो१४ दण्डपालस्त्रिपञ्चमः१५। षोड़शो दुर्गपालश्च१६ तथा राष्ट्रान्तपालकः१७। अटवीपालकान्तानि१८ तीर्थान्यष्टादशैव तु। चारान् विचारयेत्तीर्थेष्वात्मनश्च परस्य च। पाषण्डादीनविज्ञातानन्योन्यमितरेष्वपि। मन्त्रिणं युवराजञ्च हित्वा स्वेषु पुरोहितमिति” एषां तीर्थशब्दवाच्यत्वे हलायुधः “योनौ जलावतारे च मन्त्र्याद्यष्टादशस्वपि। पुण्यक्षेत्रे तथा पात्रे तीर्थं स्याद्दर्शनेष्वपि”। इति परेषामष्टादशसु स्वस्य मन्त्रिपुरोहितयुवराजवर्जं पञ्चदशसु च तीर्थेषु चारानन्यैः परस्परं चाविज्ञातांस्त्रींस्त्रीन् प्रयुज्य तत्रत्यां वार्त्तां सर्वचारसंवादे तथ्यां जानीयात्” नी॰ क॰।

२॰जलाशयादरत्निमात्रदेशे आदित्यपुराणे “अरत्निमात्रं जलं त्यक्त्वा कुर्य्याच्छौचमनुद्धृते। पश्चाच्च शोधयेत्तीर्थमन्यथा न शुचिर्भवेत्”। तस्मिन् देशे शौचं न कर्त्तव्यं यस्मादरत्निमात्रव्यवहितजलात् तत् स्थलमेव तीर्थं जलसमीपत्वात्” आ॰ त॰।

“तीर्थाश्रमवनारण्यगिरिपर्वतसागराः। सरस्वती भारती च पुरीति दश कीर्त्तिताः” महानि॰ तन्त्रोक्ते ३सन्न्यासिनामुपाधिभेदे। तल्लक्षणं तत्रैव “त्रिवेणीसङ्गमे तीर्थे तत्त्वमस्यादिलक्षणे। स्नायात्तीर्थभावेन तीर्थनामा स उच्यते”। अन्यानि च भौमतीर्थानि भारततीर्थयात्रापर्वादौ पुराणान्तरेषु प्रसिद्धानि। “अन्यानि यानि तीर्थानि काशीप्राप्तिकराणि च। काशीं प्राप्यैव मोक्षन्ते नान्यथा कल्पकोटिभिः” नीलकण्ठधृतवाक्यम्।

**तीर्थंकर** पु॰ तीर्थं शास्त्रं करोति कृ—ट। १जिने हेमच॰। २शास्त्रकरे त्रि॰। ३विष्णौ पु॰। “मनोजवस्तीर्थकरः” विष्णु स॰। “चतुर्दशविद्यानां बाह्यसमयानां च प्रणेता प्रवक्ता चेति तीर्थकरः हयग्रीवरूपेण मधुकैटभौ हत्वा विरिञ्चये सर्गादौ सर्वाः श्रुतीरन्याश्च विद्या उपादिशत् बाह्यविद्याः सुरवैरिणां वञ्चनाय चोपादिशदिति पौराणिकाः कथयन्ति” भाष्यम्।

**तीर्थकाक** पु॰ तीर्थे काक इव लोलुपत्वात्। तीर्थे काकसदृशव्यवहारिणि लोलुपे। तीर्थध्वाङ्क्षादयोऽप्यत्र।

**तीर्थकृत्** पु॰ तीर्थं करोति कृ—क्विप् ६त॰। १जिनदेवे हेमच॰। २शास्त्रकरे त्रि॰। [हेमच॰।

**तीर्थङ्कर** पु॰ तीर्थं शास्त्रं करोति कृ—ख सुम् च। जिनदेवे

**तीर्थदेव** पु॰ तीर्थमिव श्रेष्ठः देवः तीर्थे दीव्यति वा दिव–अच् वा। शिवे शिवसहस्रनाम।

**तीर्थमहाह्रद** पु॰ तीर्थरूपो महाह्रदः। स्वनामख्याते तीर्थभेदे “नन्दा चापरनन्दा च तथा तीर्थमहाह्रदः” भा॰ अनु॰ १६५ अ॰। नानातीर्थोक्तौ।

**तीर्थयात्रा** स्त्री तीर्थमुद्दिश्य यात्रा। १तीर्थोद्देशेन यात्रायाम्। तद्विधिः मत्कृतगयाश्राद्धादिपद्धतौ दृश्यः। भारतान्तर्गते २वनपर्वाऽवान्तरपर्वभेदे। “तीर्थयात्रा ततः पर्व कुरुराजस्य धीमतः” भा॰व॰ १अ॰। तच्च वनपर्वणि ८०अध्यायावधि१५६अध्यायान्तम्। [तीर्थराजिशब्दे उदा॰

**तीर्थराज** पु॰ तीर्थानां राजा षच्समा॰। प्रयागे तीर्थे।

**तीर्थराजि(जी)** स्त्री तीर्थानां राजिरत्र। अविमुक्ते काश्यां त्रिका॰ वा ङीप्। निन्दनातत्राष्टषष्टितीर्थानामानयनात्तथात्वम्। यथोक्तं काशी॰ ६९ अ॰। “सर्वरत्नमया रम्या साष्टषष्टिरभूदिह। भूर्भुवःस्वस्तले यानि शुभान्यायतनानि हि। मुक्तिदान्यपि तानीह मयाऽऽनीतानि सर्वतः। यतोयच्च समानीतं यत्र यच्च कृतास्पदम्। कथयिष्याम्यहं नाथ! क्षणं तदवधीयताम्। स्थाणुर्नाम महालिङ्गं देवदेवस्य मोक्षदम्। कुरुक्षेत्रादिहोद्भूतं कलाशेषोऽस्ति तत्र वै। तदग्रे सन्निहित्याख्या महापुष्करिणी शुभा। लोलार्कपश्चिमे भागे कुरुक्षेत्रस्थली तु सा। तत्र स्नातं कृतं जप्तं तप्तं दत्तं शुभार्थिभिः। कुरुक्षेत्राद्भवेत् सत्यं कोटिकोटिगुणाधिकम्। नैमिषाद्देव देवोऽत्र ब्रह्मावर्त्तेन संयुतः। तत्रांशमात्रं संस्थाप्य काश्यामाविरभूद्विभो!। ढुण्ढिराजोत्तरे भागे सिद्धिदं साधकस्य वै। लिङ्गं वै देवदेवाख्यं तदग्रे कूप उत्तमः। ब्रह्मावर्त्त इति ख्यातः पुनरावृत्तिकृन्तनाम्। तत्कूपाद्भिः कृतस्नानो देवदेवं समर्च्य च। तत्पुण्याद्नैमिषारण्यात् कोटिकोटिगुणं स्मृतम्। गोकर्णायतनादत्र स्वयमाविरभून्महत्। लिङ्गं महाबलं नाम शाम्बादित्यसमीपतः। दर्शनात् स्पर्शनादस्य क्षणादेनो महाबलम्। वाताहततूलराशिरिव विद्राति दूरतः। कपालमोचनपुरो दृष्ट्वा लिङ्गं महाबलम्। महाबल-